श्रीललितासहस्रनाम स्तोत्रम्

(प्रयोगविधि सहित)

आचार्य राजगौरव ठाकुर (मैथिल)

महर्षि याज्ञवल्क्य आगम-निगम शोध संस्थान फाउंडेशन

माघ शुक्ल प्रतिपदा २०८२

॥ श्रीमात्रे नमः ॥

विषय सूची

प्रारम्भिक पूजन 3

पञ्चदेवता पूजन........ 7

विष्णु पूजा........ 9

गौरी पूजन........ 11

संकल्प 13

श्रीदेवी पूजन 13

ध्यानम्........ 18

श्रीललितासहस्रनामस्तोत्रम् 18

प्रधान आरती........ 37

कर्म समर्पण मातृका स्तोत्र 37

॥ श्रीः ॥

प्रारम्भिक पूजन

नोटः- मंत्र में **ॐ/नमो/श्री/ह्लीम्** का प्रयोग अपने अधिकार की सीमा में करना चाहिए।

दाहिने हाथ में जल लेकर तीन बार आचमन करेः-

ॐ/नमो/श्री/ह्लीम् केशवाय नमः
ॐ/नमो/श्री/ह्लीम् नारायणाय नमः
ॐ/नमो/श्री/ह्लीम् माधवाय नमः।

अब हाथ धो लेंः-

ॐ/नमो/श्री/ह्लीम् ह्लषिकेशाय नम :
ॐ/नमो/श्री/ह्लीम् जनार्दनाय नमः
ॐ/नमो/श्री/ह्लीम् गोविंदाय नमो नमः!

मार्जन (अपने ऊपर तथा सभी वस्तुओं पर जल छिड़के)ः-

ॐ/नमो/श्री/ह्लीम्
अपवित्रः पवित्रो वा सर्वाऽवस्थां गतोऽपिवा।
यः स्मरेत् पुण्डरीकाक्षम स बाह्याभ्यन्तरः शुचिः॥

आसन शुद्धिः (आसन का स्पर्श करें)ः-

ॐ/नमो/श्री/ह्लीम्
पृथ्वी त्वया धृता लोक देवी त्वं विष्णुना धृता।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम्॥

जल शुद्धि(जल पात्र का स्पर्श करें):–

ॐ/नमो/श्री/ह्लीम्
गंगे च यमुने चैव गोदावरी सरस्वती।
नर्मदे सिंधु कावेरी जले अस्मिन संनिधि कुरु॥

जल पात्र की पूजा करेंगे अक्षत पुष्प इत्यादि से:–

ॐ/नमो/श्री/ह्लीम् अपाय नमः
ॐ/नमो/श्री/ह्लीम् अप्प पतये वरुणाय नमः
ॐ/नमो/श्री/ह्लीम् गंगादी सकल तीर्थेभ्यो नमः!

पुष्प शुद्धि (पुष्प पात्र का स्पर्श करें):–

ॐ/नमो/श्री/ह्लीम्
पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्प सम्भवे पुष्पचयावकिर्णे च हुम् फट् स्वाहा।

एक फूल को बाएं हाथ से मसलकर ईशान कोण में फेंक दें:–

ॐ/नमो/श्री/ह्लीम्
ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः!
मृत्यु रोग भय क्रोधा पतंतु रिपु मस्तके॥

भूत शुद्धि (पिले सरसों को अथवा अक्षत को अभिमंत्रित कर दसो दिशाओं में छिड़के)

ॐ/नमो/श्री/ह्लीम्
अप्सर्पन्तु ते भूता ये भूता भूवि सन्सथिता।
ये भूता विघ्न कर्तारः ते नश्यन्तु शिवाज्ञया॥

शंखपूजन (शंख को भूमि पर न रखे किसी आधार या पात्र में रखें। शंख में जल भर दें।)

ॐ/नमो/श्री/ह्लीम्
शङ्खं चन्द्रार्क दैवत्यं मध्ये वरुण दैवतम्।
पृष्ठे प्रजापति विद्यात् अग्रे गङ्गा सरस्वती॥

त्वं पुरा सागरोत्पन्नः विष्णुना विधृतः करे।
पूजितः सर्व देवैश्च पाञ्चजन्य नमोऽस्तु ते॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य च आज्ञया।
शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत्॥

पाञ्चजन्याय विद्महे पवमानाय धीमहि। तन्नः शङ्खः प्रचोदयात्॥

घंटा पूजन–

ॐ/नमो/श्री/ह्लीम्
आगमार्थं तु देवानां गमनार्थं तु राक्षसाम्।
कुर्वे घंटारवं सर्व देवताह्वान् लाञ्चनम्॥

दीपपूजन (पुष्प दीप के नीचे छोड़े):–

ॐ/नमो/श्री/ह्लीम्
भो दीप देव रूपः कर्म साक्षीः अविघ्न कृत।
यावत कर्म समाप्तिः स्यात तावत त्वं सूस्थिरो भव॥

धूप पूजन (पुष्प धूप के नीचे छोड़े):–

ॐ/नमो/श्री/ह्रीम्
गन्धर्वदेवतात्मानं सुगन्धिस्रवणं शुभम्।
नमो धूप पात्राय पावनाय मनोरमे॥

यस्य धूमाः सुरैः सेव्याः पुण्यगन्धाः समुज्ज्वलाः।
मङ्गलं वितरन्त्यस्मै सर्वसौख्यमुदारतः॥

ॐ/नमो/श्री/ह्रीम् गन्धर्व दैवत्याय धूप पात्राय नमः॥

धूप-दीप का स्पर्श करने के बाद हाथ धोना चाहिएः–

ॐ/नमो/श्री/ह्रीम् ॐ/नमो/श्री/ह्रीम् ह्रषिकेशाय नमः

सभी पूजन उपचार सामग्री के ऊपर पुष्प छोड़ेः–

ॐ/नमो/श्री/ह्रीम् नाना विध उपचारसामग्रीभ्यो नमः!!

सूर्य को अर्घ दें**–**

ॐ/नमो/श्री/ह्रीम्
एहि सूर्य सहस्त्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोस्तुते॥

चन्द्रमा को अर्घ दें**–**

ॐ/नमो/श्री/ह्रीम्
दधिशंखतुषाराभं क्षीरोदार्णवसंभवम।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम॥

स्वस्तयन (हाथ में गंध-पुष्प-अक्षत लेकर)

ॐ/नमो/श्री/ह्लीम्
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥

विनायकं गुरुः भानु ब्रह्मा विष्णु महेश्वरान।
सरस्वती च प्रणम्यादौ सर्वकार्येषु सिद्धये॥

ॐ/नमो/श्री/ह्लीम् शान्तिः शान्तिः शान्तिः॥

पञ्चदेवता पूजन

अक्षत लेकर आवाहन–

ॐ/नमो/श्री/ह्लीम् सूर्यादिदिपञ्चदेवताः इहागच्छत इह तिष्ठत।

पाद्यः–

इदं पादयोः पाद्यं ॐ/नमो/श्री/ह्लीम् सूर्यादिपञ्चदेवताभ्यो नमः।

अर्घ्यः–

एतानि पाद्यादीनि एषोऽर्घ्यः ॐ/नमो/श्री/ह्लीम् सूर्यादिपञ्चदेवताभ्यो नमः।

आचमनः–

इदं आचमनीयं जलं ॐसूर्यादिपञ्चदेवताभ्यो नमः।

स्नानः–

इदं स्नानीयं जलं ॐ/नमो/श्री/ह्लीम् सूर्यादिपञ्चदेवताभ्यो नमः।

स्नानान्त आचमनः–

स्नानान्ते अचमनीयं जलं ॐ/नमो/श्री/ह्लीम् सूर्यादिपञ्चदेवताभ्यो नमः।

जल से उत्सर्ग करेः–

एतानी पाद्य अर्ध्याचमनीयस्नानीय पुनराचमनीयानी ॐ/नमो/श्री/ह्लीम् सूर्यादिपञ्चदेवताभ्यो नमः।

चन्दनः–

इदमनुलेपनम् ॐसूर्यादिदिपञ्चदेवताभ्यो नमः।

अक्षतः–

इदमक्षतम्ॐ/नमो/श्री/ह्लीम् सूर्यादिदिपञ्चदेवताभ्यो नमः।

फूलः–

इदं पुष्पम् नमो सूर्यादिपञ्चदेवताभ्यो नमः।

बिल्वपत्रः**–**

इदं बिल्वपत्रम् ॐ/नमो/श्री/ह्लीम् पञ्चदेवताभ्यो नमः।

दूर्वाः–

इदं दूर्वादलम् ॐ/नमो/श्री/ह्लीम् पञ्चदेवताभ्यो नमः।

अरघी में जल लेकर धूप, दीप, नैवेद्य, पान सुपारी का उत्सर्ग करेः–

एतानिगन्ध-पुष्प-धूप-दीप-ताम्बूल-यथाभाग-नानाविधनैवेद्यानि ॐ/नमो/श्री/ह्लीम् सूर्यादिपञ्चदेवताभ्यो नमः।

अरघी में जल ले आचमनः–

इदमाचनीयं ॐ/नमो/श्री/ह्रीम् सूर्यादिपञ्चदेवताभ्यो नमः ॥

फूलः:–

एष पुष्पांजलिः ॐ/नमो/श्री/ह्रीम् सूर्यादिपञ्चदेवताभ्यो नमः।

विष्णु पूजा

इसके बाद विष्णु की पूजा करे क्योंकि मैथिल परम्परा के अनुसार विष्णु पंचदेवता में गणित नहीं हैं। यज्ञेश्वर होने के नाते उनकी अलग से पूजा की जाती है।

नोटः– सौभाग्यवती माताएँ विष्णु के स्थान पर गौरी का पूजन करे। गौरी पूजन का विधान नीचे विष्णु पूजन के पश्चात दिया गया है।

यव तिल लेकर आवाहन करेंः–

ॐ/नमो/श्री/ह्रीम् भगवन् श्रीविष्णो इहागच्छ इह तिष्ठ।

जल लेकरः–

एतानि पाद्यादीनि एषोऽर्घ्यः ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

पाद्यः:–

इदं पादयोः पाद्यं ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

अर्घ्यः–

एतानि पाद्यादीनि एषोऽर्घ्यः ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

आचमनः–

इदं आचमनीयं जलं ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

स्नानः–

इदं स्नानीयं जलं ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

स्नानान्त आचमनः–

स्नानान्ते अचमनीयं जलं ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

जल से उत्सर्ग करेः–

एतानी पाद्य अर्घ्याचमनीयस्नानीय पुनराचमनीयानी ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

चन्दनः–

इदमनुलेपनम् ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

जौ तिलः–

एते यव तिलाःॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।।

फूलः–

इदं पुष्पम् ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

तुलसीपत्रः–

इदं तुलसी पत्रम ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

दूर्वाः–

इदं दूर्वादलम् ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

अरघी में जल लेकर धूप, दीप, नैवेद्य, पान सुपारी का उत्सर्ग करेः–

एतानि गन्ध-पुष्प-धूप-दीप-ताम्बूल-यथाभाग-नानाविधनैवेद्यानि ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

अरघी में जल ले आचमनः–

इदमाचनीयं ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

फूलः–

एष पुष्पांजलिः ॐ/नमो/श्री/ह्रीम् भगवते श्रीविष्णवे नमः।

गौरी पूजन

अक्षत लेकर आवाहनः–

नमो श्री गौरी इहागच्छ इह तिष्ठ।

पाद्यः–

इदं पादयोः पाद्यं गौर्यै नमः।

अर्घ्यः–

एतानि पाद्यादीनि एषोऽर्घ्यः गौर्यै नमः।

आचमनः–

इदं आचमनीयं जलं गौर्यै नमः।

स्नानः–

इदं स्नानीयं जलं गौर्यै नमः।

स्नानान्त आचमनः–

स्नानान्ते अचमनीयं जलं गौर्यै नमः।

जल से उत्सर्ग करेः–

एतानी पाद्य अर्घ्याचमनीयस्नानीय पुनराचमनीयानी गौर्यै नमः।

चन्दनः–

इदमनुलेपनम् गौर्यै नमः।

अक्षतः–

इदमक्षतम् गौर्यै नमः।

फूलः–

इदं पुष्पम् नमो गौर्यै नमः।

बिल्वपत्रः**–**

इदं बिल्वपत्रम् गौर्यै नमः।

अरघी में जल लेकर धूप, दीप, नैवेद्य, पान सुपारी का उत्सर्ग करेः–

एतानिगन्ध-पुष्प-धूप-दीप-ताम्बूल-यथाभाग-नानाविधनैवेद्यानि गौर्यै नमः॥

अरघी में जल ले आचमनः–

इदमाचनीयं गौर्यै नमः॥

फूलः–

एष पुष्पांजलिः गौर्यै नमः।

नोटः– सूर्य को बिल्वपत्र, दुर्गा को दूर्वा, गणेश को तुलसी, शिव को शंख का जल, विष्णु को अक्षत वर्जित है। विष्णु को अक्षत के स्थान पर तिल अर्पित करना चाहिए।

पुष्पांजलिः–

ॐ/नमो/श्री/ह्रीम्
सूर्यं गणेशं हुतभुक् महेशं, शक्तिं च विष्णुं प्रणमामि नित्यम्।
ते भक्तवत्साः करुणार्णवास्ते, सर्वे मम सन्तु सुखाय देवाः॥

(राजगौरवकृत पंचदेव स्तुति प्रथम श्लोक)

संकल्प

ॐ अस्य श्रीललिता-सहस्रनाम-स्तोत्रस्य वशिन्यादि वाग्देवता ऋषयः। अनुष्टुप् छन्दः। श्रीललिता महात्रिपुरसुन्दरी देवता। श्रीललितामहात्रिपुरसुन्दरी-प्रीत्यर्थं धर्मार्थ-काम-मोक्ष-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं सकल दुरित-क्षयपूर्वकं सर्वाभीष्ट-सिद्ध्यर्थं सर्वमनो कामना-परिपूर्त्यर्थं अहं (वा वयं) श्रीललिता-सहस्रनाम-स्तोत्र-पाठं करिष्ये (करिष्यामः)॥

श्रीदेवी पूजन

श्रीयन्त्रपूजन पर, प्रतिमा पर, पिंडिका पर अथवा सुपारी इत्यादि पर भगवती का नित्य आवाहन और पूजन करना चाहिए।

विनियोगः–

अस्य श्रीललितासहस्रनाम स्तोत्र माला मन्त्रस्य वशिन्यादिवाग्देवता ऋषयः, अनुष्टुप् छन्दः,श्रीललिता परमेश्वरी देवता, श्रीमद्वाग्भवकूटेति बीजम्,

मध्यकूटेति शक्तिः, शक्तिकूटेति कीलकम्, श्रीललितामहात्रिपुरसुन्दरी-प्रसादसिद्धिद्धारा चिन्तितफलावाप्त्यर्थे जपे विनियोगः।

हाथ में पुष्प लेकर ध्यान करेंगेः–

अरुणां करुणातरंग्ड़िताक्षीं, धृतपाशांकुशबाणचापहस्ताम्।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम्॥

लं पृथिवीतत्त्वात्मिकायै श्रीललितादेव्यै गन्धं परिकल्पयामि।
हं आकाशतत्त्वात्मिकायै श्रीललितादेव्यै पुष्पं परिकल्पयामि।
यं वायुतत्त्वात्मिकायै श्रीललितादेव्यै धूपं परिकल्पयामि।
रं वह्नितत्त्वात्मिकायै श्रीललितादेव्यै दीपं परिकल्पयामि।
वं अमृततत्त्वात्मिकायै श्रीललितादेव्यै अमृतनैवेद्यं परिकल्पयामि।
सं सर्वतत्त्वात्मिकायै श्रीललितादेव्यै सर्वोपचारान् परिकल्पयामि।

अक्षत लेकर आवाहनः–

ॐ/नमो/श्री/ह्रीम् अद्य अस्मिन मंडले मंडलावरण देवता सहित परम भट्टारिका भगवती त्रिपुर सुन्दरी इहागच्छ इह तिष्ठ।

पाद्यः–

इदं पादयोः पाद्यं अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती बालात्रिपुरसुन्दरी देव्यै नमः!

अर्घ्यः–

एतानि पाद्यादीनि एषोऽर्घ्यः ॐ/नमो/श्री/ह्रीम् अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!

आचमनः–

इदं आचमनीयं जलं अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!

स्नानः–

इदं स्नानीयं जलं अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती बालात्रिपुरसुन्दरी देव्यै नमः!

स्नानान्त आचमनः–

स्नानान्ते अचमनीयं जलं अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती बालात्रिपुरसुन्दरी देव्यै नमः!

जल से उत्सर्ग करेः–

एतानी पाद्य अर्ध्याचमनीयस्नानीय पुनराचमनीयानी अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती बालात्रिपुरसुन्दरी देव्यै नमः!

चन्दनः–

इदमनुलेपनम् अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती बालात्रिपुरसुन्दरी देव्यै नमः!

अक्षतः–

इदमक्षतम् अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!।

फूलः–

इदं पुष्पम् अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!

बिल्वपत्रः–

इदं बिल्वपत्रम् अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!।

दूर्वाः–

इदं दूर्वादलम् अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!।

अरघी में जल ले धूप, दीप, नैवेद्य, पान-सुपारी का उत्सर्ग करेः–

एतानिगन्ध-पुष्प-धूप-दीप-ताम्बूल-यथाभाग-नानाविधनैवेद्यानि अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!

अरघी में जल ले आचमन-

इदमाचनीयं अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!

फूलः–

ॐ/नमो/श्री/ह्रीम् नमस्त्रिपुरसुन्दरी, हृदयदेवी, शिरोदेवी, शिखादेवी, कवचदेवी, नेत्रदेवी, अस्त्रदेवी, कामेश्वरी, भगमालिनी, नित्यक्लिन्ने, भेरुण्डे, वह्निवासिनी, महावज्रेश्वरी, शिवदूती, त्वरिते, कुलसुन्दरी, नित्ये, नीलपताके, विजये, सर्वमङ्गले, ज्वालामालिनी, चित्रे, महानित्ये,परमेश्वर, परमेश्वरी, मित्रेशमयी, षष्ठीशमयी, चर्यानाथमयी, लोपामुद्रमयी, अगस्त्यमयी, कालतापशमयी, धर्माचार्यमयी, मुक्तकेशीश्वरमयी, दीपकलानाथमयी, विष्णुदेवमयी, प्रभाकरदेवमयी, तेजोदेवमयी,

मनोजदेवमयि, कल्याणदेवमयी, वासुदेवमयी, रत्नदेवमयी, श्रीरामानन्दमयी, अणिमासिद्धे, लघिमासिद्धे, गरिमासिद्धे, महिमासिद्धे, ईशित्वसिद्धे, वशित्वसिद्धे, प्राकाम्यसिद्धे, भुक्तिसिद्धे, इच्छासिद्धे, प्राप्तिसिद्धे, सर्वकामसिद्धे, ब्राह्मी, माहेश्वरी, कौमारि, वैष्णवी, वाराही, माहेन्द्री, चामुण्डे, महालक्ष्मी, सर्वसङ्क्षोभिणी, सर्वविद्राविणी, सर्वाकर्षिणी, सर्ववशङ्करी, सर्वोन्मादिनी, सर्वमहाङ्कुशे, सर्वखेचरी, सर्वबीजे, सर्वयोने, सर्वत्रिखण्डे, त्रैलोक्यमोहन चक्रस्वामिनी, प्रकटयोगिनी, कामाकर्षिणी, बुद्ध्याकर्षिणी, अहङ्काराकर्षिणी, शब्दाकर्षिणी, स्पर्शाकर्षिणी, रूपाकर्षिणी, रसाकर्षिणी, गन्धाकर्षिणी, चित्ताकर्षिणी, धैर्याकर्षिणी, स्मृत्याकर्षिणी, नामाकर्षिणी, बीजाकर्षिणी, आत्माकर्षिणी, अमृताकर्षिणी, शरीराकर्षिणी, सर्वाशापरिपूरक चक्रस्वामिनी, गुप्तयोगिनी, अनङ्गकुसुमे, अनङ्गमेखले, अनङ्गमदने, अनङ्गमदनातुरे, अनङ्गरेखे, अनङ्गवेगिनी, अनङ्गाङ्कुशे, अनङ्गमालिनी, सर्वसङ्क्षोभणचक्रस्वामिनी, गुप्ततरयोगिनी, सर्वसङ्क्षोभिणी, सर्वविद्राविनी, सर्वाकर्षिणी, सर्वह्लादिनी, सर्वसम्मोहिनी, सर्वस्तम्भिनी, सर्वजृम्भिणी, सर्ववशङ्करी, सर्वरञ्जनी, सर्वोन्मादिनी, सर्वार्थसाधिके, सर्वसम्पत्तिपूरिणी, सर्वमन्त्रमयी, सर्वद्वन्द्वक्षयङ्करी, सर्वसौभाग्यदायक चक्रस्वामिनी, सम्प्रदाययोगिनी, सर्वसिद्धिप्रदे, सर्वसम्पत्प्रदे, सर्वप्रियङ्करी, सर्वमङ्गलकारिणी, सर्वकामप्रदे, सर्वदुःखविमोचनी, सर्वमृत्युप्रशमनि, सर्वविघ्ननिवारिणी, सर्वाङ्गसुन्दरी, सर्वसौभाग्यदायिनी, सर्वार्थसाधक चक्रस्वामिनी, कुलोत्तीर्णयोगिनी, सर्वज्ञे, सर्वशक्ते, सर्वैश्वर्यप्रदायिनी, सर्वज्ञानमयी, सर्वव्याधिविनाशिनी, सर्वाधारस्वरूपे, सर्वपापहरे, सर्वानन्दमयी, सर्वरक्षास्वरूपिणी, सर्वेप्सितफलप्रदे, सर्वरक्षाकरचक्रस्वामिनी, निगर्भयोगिनी, वशिनी, कामेश्वरी, मोदिनी, विमले, अरुणे, जयिनी, सर्वेश्वरी, कौलिनि, सर्वरोगहरचक्रस्वामिनी,

रहस्ययोगिनी, बाणिनी, चापिनी, पाशिनी, अङ्कुशिनी, महाकामेश्वरी, महावज्रेश्वरी, महाभगमालिनी, सर्वसिद्धिप्रदचक्रस्वामिनी, अतिरहस्ययोगिनी, श्रीश्री महाभट्टारिके, सर्वानन्दमयचक्रस्वामिनी, परापररहस्ययोगिनी, त्रिपुरे, त्रिपुरेशी, त्रिपुरसुन्दरी, त्रिपुरवासिनी, त्रिपुराश्रीः, त्रिपुरमालिनी, त्रिपुरसिद्धे, त्रिपुराम्बा, महात्रिपुरसुन्दरी, महामहेश्वरी, महामहाराज्ञी, महामहाशक्ते, महामहागुप्ते, महामहाज्ञप्ते, महामहानन्दे, महामहास्कन्धे, महामहाशये, महामहा श्रीचक्रनगरसाम्राज्ञी, नमस्ते नमस्ते नमस्ते नमः।

एष पुष्पांजलिः अस्मिन मण्डलस्थ सर्वावरण देवता सहित परमभट्टारिका भगवती त्रिपुरसुन्दरी देव्यै नमः!

ध्यानम्

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलि स्फुरत्
तारा नायक शेखरां स्मितमुखी मापीन वक्षोरुहाम्।
पाणिभ्यामलिपूर्ण रत्न चषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्न घटस्थ रक्तचरणां ध्यायेत् परामम्बिकाम्॥

श्रीललितासहस्रनामस्तोत्रम्

ॐ/नमो/श्री/ह्रीम्
श्रीमाता श्रीमहाराज्ञी श्रीमत्-सिंहासनेश्वरी।
चिदग्नि-कुण्ड-सम्भूता देवकार्य-समुद्यता॥ १ ॥

उद्यद्भानु-सहस्राभा चतुर्बाहु-समन्विता।
रागस्वरूप-पाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला॥ २ ॥

मनोरूपेक्षु-कोदण्डा पञ्चतन्मात्र-सायका।
निजारुण-प्रभापूर-मज्जद्ब्रह्माण्ड-मण्डला॥ ३ ॥

चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्कचा।
कुरुविन्दमणि-श्रेणी-कनत्कोटीर-मण्डिता॥ ४ ॥

अष्टमीचन्द्र-विभ्राज-दलिकस्थल-शोभिता।
मुखचन्द्र-कलङ्काभ-मृगनाभि-विशेषका॥ ५ ॥

वदनस्मर-माङ्गल्य-गृहतोरण-चिल्लिका।
वक्त्रलक्ष्मी-परीवाह-चलन्मीनाभ-लोचना॥ ६ ॥

नवचम्पक-पुष्पाभ-नासादण्ड-विराजिता।
ताराकान्ति-तिरस्कारि-नासाभरण-भासुरा॥ ७ ॥

कदम्बमञ्जरी-क्लृप्त-कर्णपूर-मनोहरा।
ताटङ्क-युगली-भूत-तपनोडुप-मण्डला॥ ८ ॥

पद्मराग-शिलादर्श-परिभावि-कपोलभूः।
नवविद्रुम-बिम्बश्री-न्यक्कारि-रदनच्छदा॥ ९ ॥

शुद्ध-विद्याङ्कुराकार-द्विजपङ्क्ति-द्वयोज्ज्वला।
कर्पूर-वीटिकामोद-समाकर्षि-दिगन्तरा॥ १० ॥

निज-सल्लाप-माधुर्य-विनिर्भर्त्सित-कच्छपी।
मन्दस्मित-प्रभापूर-मज्जत्कामेश-मानसा॥ ११ ॥

अनाकलित-सादृश्य-चिबुकश्री-विराजिता।
कामेश-बद्ध-माङ्गल्य-सूत्र-शोभित-कन्धरा॥ १२ ॥

कनकाङ्गद-केयूर-कमनीय-भुजान्विता।

रत्नग्रैवेय-चिन्ताक-लोल-मुक्ता-फलान्विता॥ १३॥

कामेश्वर-प्रेमरत्न-मणि-प्रतिपण-स्तनी।

नाभ्यालवाल-रोमालि-लता-फल-कुचद्वयी॥ १४॥

लक्ष्यरोम-लताधारता-समुन्नेय-मध्यमा।

स्तनभार-दलन्मध्य-पट्टबन्ध-वलित्रया॥ १५॥

अरुणारुण-कौसुम्भ-वस्त्र-भास्वत्-कटीतटी।

रत्न-किङ्किणिका-रम्य-रशना-दाम-भूषिता॥ १६॥

कामेश-ज्ञात-सौभाग्य-मार्दवोरु-द्वयान्विता।

माणिक्य-मुकुटाकार-जानुद्वय-विराजिता॥ १७॥

इन्द्रगोप-परिक्षिप्त-स्मरतूणाभ-जङ्घिका।

गूढगुल्फा कूर्मपृष्ठ-जयिष्णु-प्रपदान्विता॥ १८॥

नख-दीधिति-संछन्न-नमज्जन-तमोगुणा।

पदद्वय-प्रभाजाल-पराकृत-सरोरुहा॥ १९॥

सिञ्जान-मणिमञ्जीर-मण्डित-श्री-पदाम्बुजा।

मराली-मन्दगमना महालावण्य-शेवधिः॥ २०॥

सर्वारुणाऽनवद्याङ्गी सर्वाभरण-भूषिता।

शिव-कामेश्वराङ्कस्था शिवा स्वाधीन-वल्लभा॥ २१॥

सुमेरु-मध्य-शृङ्गस्था श्रीमन्नगर-नायिका।

चिन्तामणि-गृहान्तस्था पञ्च-ब्रह्मासन-स्थिता॥ २२॥

महापद्माटवी-संस्था कदम्बवन-वासिनी।
सुधासागर-मध्यस्था कामाक्षी कामदायिनी॥ २३॥

देवर्षि-गण-संघात-स्तूयमानात्म-वैभवा।
भण्डासुर-वधोद्युक्त-शक्तिसेना-समन्विता॥ २४॥

सम्पत्करी-समारूढ-सिन्धुर-व्रज-सेविता।
अश्वारूढाधिष्ठिताश्व-कोटि-कोटिभिरावृता॥ २५॥

चक्रराज-रथारूढ-सर्वायुध-परिष्कृता।
गेयचक्र-रथारूढ-मन्त्रिणी-परिसेविता॥ २६॥

किरिचक्र-रथारूढ-दण्डनाथा-पुरस्कृता।
ज्वाला-मालिनिकाक्षिप्त-वह्निप्राकार-मध्यगा॥ २७॥

भण्डसैन्य-वधोद्युक्त-शक्ति-विक्रम-हर्षिता।
नित्या-पराक्रमाटोप-निरीक्षण-समुत्सुका॥ २८॥

भण्डपुत्र-वधोद्युक्त-बाला-विक्रम-नन्दिता।
मन्त्रिण्यम्बा-विरचित-विषङ्ग-वध-तोषिता॥ २९॥

विशुक्र-प्राणहरण-वाराही-वीर्य-नन्दिता।
कामेश्वर-मुखालोक-कल्पित-श्रीगणेश्वरा॥ ३०॥

महागणेश-निर्भिन्न-विघ्नयन्त्र-प्रहर्षिता।
भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्षिणी॥ ३१॥

कराङ्गुलि-नखोत्पन्न-नारायण-दशाकृतिः।
महा-पाशुपतास्त्राग्नि-निर्दग्धासुर-सैनिका॥ ३२॥

कामेश्वरास्त्र-निर्दग्ध-सभण्डासुर-शून्यका।
ब्रह्मोपेन्द्र-महेन्द्रादि-देव-संस्तुत-वैभवा॥ ३३॥

हर-नेत्राग्नि-संदग्ध-काम-सञ्जीवनौषधिः।
श्रीमद्वाग्भव-कूटैक-स्वरूप-मुख-पङ्कजा॥ ३४॥

कण्ठाधः-कटि-पर्यन्त-मध्यकूट-स्वरूपिणी।
शक्ति-कूटैकतापन्न-कट्यधोभाग-धारिणी॥ ३५॥

मूल-मन्त्रात्मिका मूलकूटत्रय-कलेवरा।
कुलामृतैक-रसिका कुलसंकेत-पालिनी॥ ३६॥

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी।
अकुला समयान्तस्था समयाचार-तत्परा॥ ३७॥

मूलाधारैक-निलया ब्रह्मग्रन्थि-विभेदिनी।
मणि-पूरान्तरुदिता विष्णुग्रन्थि-विभेदिनी॥ ३८॥

आज्ञा-चक्रान्तरालस्था रुद्रग्रन्थि-विभेदिनी।
सहस्राराम्बुजारूढा सुधा-साराभिवर्षिणी॥ ३९॥

तडिल्लता-समरुचिः षट्चक्रोपरि-संस्थिता।
महासक्तिः कुण्डलिनी बिसतन्तु-तनीयसी॥ ४०॥

भवानी भावनागम्या भवारण्य-कुठारिका।
भद्रप्रिया भद्रमूर्तिर् भक्त-सौभाग्यदायिनी॥ ४१॥

भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा।
शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी॥ ४२॥

शाङ्करी श्रीकरी साध्वी शरच्चन्द्र-निभानना।
शातोदरी शान्तिमती निराधारा निरञ्जना॥ ४३ ॥

निर्लेपा निर्मला नित्या निराकारा निराकुला।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा॥ ४४ ॥

नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा॥ ४५ ॥

निष्कारणा निष्कलङ्का निरुपाधिर् निरीश्वरा।
नीरागा रागमथनी निर्मदा मदनाशिनी॥ ४६ ॥

निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी॥ ४७ ॥

निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी।
निःसंशया संशयघ्नी निर्भवा भवनाशिनी॥ ४८ ॥

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा॥ ४९ ॥

निस्तुला नीलचिकुरा निरपाया निरत्यया।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा॥ ५० ॥

दुष्टदूरा दुराचार-शमनी दोषवर्जिता।
सर्वज्ञा सान्द्रकरुणा समानाधिक-वर्जिता॥ ५१ ॥

सर्वशक्तिमयी सर्व-मङ्गला सद्गतिप्रदा।
सर्वेश्वरी सर्वमयी सर्वमन्त्र-स्वरूपिणी॥ ५२ ॥

सर्व-यन्त्रात्मिका सर्व-तन्त्ररूपा मनोन्मनी।
माहेश्वरी महादेवी महालक्ष्मीर् मृडप्रिया॥ ५३ ॥

महारूपा महापूज्या महापातक-नाशिनी।
महामाया महासत्त्वा महाशक्तिर् महारतिः॥ ५४॥

महाभोगा महैश्वर्या महावीर्या महाबला।
महाबुद्धिर् महासिद्धिर् महायोगेश्वरेश्वरी॥ ५५ ॥

महातन्त्रा महामन्त्रा महायन्त्रा महासना।
महायाग-क्रमाराध्या महाभैरव-पूजिता॥ ५६ ॥

महेश्वर-महाकल्प-महाताण्डव-साक्षिणी।
महाकामेश-महिषी महात्रिपुर-सुन्दरी॥ ५७॥

चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी।
महाचतुः-षष्टिकोटि-योगिनी-गणसेविता॥ ५८ ॥

मनुविद्या चन्द्रविद्या चन्द्रमण्डल-मध्यगा।
चारुरूपा चारुहासा चारुचन्द्र-कलाधरा॥ ५९ ॥

चराचर-जगन्नाथा चक्रराज-निकेतना।
पार्वती पद्मनयना पद्मराग-समप्रभा॥ ६० ॥

पञ्च-प्रेतासनासीना पञ्चब्रह्म-स्वरूपिणी।
चिन्मयी परमानन्दा विज्ञान-घनरूपिणी॥ ६१ ॥

ध्यान-ध्यातृ-ध्येयरूपा धर्माधर्म-विवर्जिता।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका॥ ६२ ॥

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्था-विवर्जिता।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी॥ ६३ ॥

संहारिणी रुद्ररूपा तिरोधान-करीश्वरी।
सदाशिवाऽनुग्रहदा पञ्चकृत्य-परायणा॥ ६४ ॥

भानुमण्डल-मध्यस्था भैरवी भगमालिनी।
पद्मासना भगवती पद्मनाभ-सहोदरी॥ ६५ ॥

उन्मेष-निमिषोत्पन्न-विपन्न-भुवनावली।
सहस्र-शीर्षवदना सहस्राक्षी सहस्रपात्॥ ६६ ॥

आब्रह्म-कीट-जननी वर्णाश्रम-विधायिनी।
निजाज्ञारूप-निगमा पुण्यापुण्य-फलप्रदा॥ ६७ ॥

श्रुति-सीमन्त-सिन्दूरी-कृत-पादाब्ज-धूलिका।
सकलागम-सन्दोह-शुक्ति-सम्पुट-मौक्तिका॥ ६८ ॥

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी।
अम्बिकाऽनादि-निधना हरिब्रह्मेन्द्र-सेविता॥ ६९ ॥

नारायणी नादरूपा नामरूप-विवर्जिता।
ह्रींकारी ह्रीमती हृद्या हेयोपादेय-वर्जिता॥ ७० ॥

राजराजार्चिता राज्ञी रम्या राजीवलोचना।
रञ्जनी रमणी रस्या रणत्किङ्किणि-मेखला॥ ७१ ॥

रमा राकेन्दुवदना रतिरूपा रतिप्रिया।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा॥ ७२ ॥

काम्या कामकलारूपा कदम्ब-कुसुम-प्रिया।
कल्याणी जगतीकन्दा करुणा-रस-सागरा॥ ७३ ॥

कलावती कलालापा कान्ता कादम्बरीप्रिया।
वरदा वामनयना वारुणी-मद-विह्वला॥ ७४ ॥

विश्वाधिका वेदवेद्या विन्ध्याचल-निवासिनी।
विधात्री वेदजननी विष्णुमाया विलासिनी॥ ७५ ॥

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्र-क्षेत्रज्ञ-पालिनी।
क्षयवृद्धि-विनिर्मुक्ता क्षेत्रपाल-समर्चिता॥ ७६ ॥

विजया विमला वन्द्या वन्दारु-जन-वत्सला।
वाग्वादिनी वामकेशी वह्निमण्डल-वासिनी॥ ७७ ॥

भक्तिमत्-कल्पलतिका पशुपाश-विमोचिनी।
संहृताशेष-पाषण्डा सदाचार-प्रवर्तिका॥ ७८ ॥

तापत्रयाग्नि-सन्तप्त-समाह्लादन-चन्द्रिका।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा॥ ७९ ॥

चितिस्तत्पद-लक्ष्यार्था चिदेकरस-रूपिणी।
स्वात्मानन्द-लवीभूत-ब्रह्माद्यानन्द-सन्ततिः॥ ८० ॥

परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता।
मध्यमा वैखरीरूपा भक्त-मानस-हंसिका॥ ८१ ॥

कामेश्वर-प्राणनाडी कृतज्ञा कामपूजिता।
शृङ्गार-रस-सम्पूर्णा जया जालन्धर-स्थिता॥ ८२ ॥

ओड्याणपीठ-निलया बिन्दु-मण्डलवासिनी।
रहोयाग-क्रमाराध्या रहस्तर्पण-तर्पिता॥ ८३ ॥

सद्यःप्रसादिनी विश्व-साक्षिणी साक्षिवर्जिता।
षडङ्गदेवता-युक्ता षाड्गुण्य-परिपूरिता॥ ८४ ॥

नित्यक्लिन्ना निरुपमा निर्वाण-सुख-दायिनी।
नित्या-षोडशिका-रूपा श्रीकण्ठार्ध-शरीरिणी॥ ८५ ॥

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी।
मूलप्रकृतिर् अव्यक्ता व्यक्ताव्यक्त-स्वरूपिणी॥ ८६ ॥

व्यापिनी विविधाकारा विद्याविद्या-स्वरूपिणी।
महाकामेश-नयन-कुमुदाह्लाद-कौमुदी॥ ८७ ॥

भक्त-हार्द-तमोभेद-भानुमद्भानु-सन्ततिः।
शिवदूती शिवाराध्या शिवमूर्तिः शिवङ्करी॥ ८८ ॥

शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता।
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा॥ ८९ ॥

चिच्छक्तिश् चेतनारूपा जडशक्तिर् जडात्मिका।
गायत्री व्याहृतिः सन्ध्या द्विजवृन्द-निषेविता॥ ९० ॥

तत्त्वासना तत्त्वमयी पञ्च-कोशान्तर-स्थिता।
निःसीम-महिमा नित्य-यौवना मदशालिनी॥ ९१ ॥

मदघूर्णित-रक्ताक्षी मदपाटल-गण्डभूः।
चन्दन-द्रव-दिग्धाङ्गी चाम्पेय-कुसुम-प्रिया॥ ९२ ॥

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी।
कुलकुण्डालया कौल-मार्ग-तत्पर-सेविता॥ ९३ ॥

कुमार-गणनाथाम्बा तुष्टिः पुष्टिर् मतिर् धृतिः।
शान्तिः स्वस्तिमती कान्तिर् नन्दिनी विघ्ननाशिनी॥ ९४॥

तेजोवती त्रिनयना लोलाक्षी-कामरूपिणी।
मालिनी हंसिनी माता मलयाचल-वासिनी॥ ९५ ॥

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी॥ ९६ ॥

वज्रेश्वरी वामदेवी वयोऽवस्था-विवर्जिता।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी॥ ९७॥

विशुद्धिचक्र-निलयाऽऽरक्तवर्णा त्रिलोचना।
खट्वाङ्गादि-प्रहरणा वदनैक-समन्विता॥ ९८ ॥

पायसान्नप्रिया त्वक्स्था पशुलोक-भयङ्करी।
अमृतादि-महाशक्ति-संवृता डाकिनीश्वरी॥ ९९ ॥

अनाहताब्ज-निलया श्यामाभा वदनद्वया।
दंष्ट्रोज्ज्वलाऽक्ष-मालादि-धरा रुधिरसंस्थिता॥ १०० ॥

कालरात्र्यादि-शक्त्यौघ-वृता स्निग्धौदनप्रिया।
महावीरेन्द्र-वरदा राकिण्यम्बा-स्वरूपिणी॥ १०१ ॥

मणिपूराब्ज-निलया वदनत्रय-संयुता।
वज्रादिकायुधोपेता डामर्यादिभिरावृता॥ १०२ ॥

रक्तवर्णा मांसनिष्ठा गुडान्न-प्रीत-मानसा।
समस्तभक्त-सुखदा लाकिन्यम्बा-स्वरूपिणी॥ १०३॥

स्वाधिष्ठानाम्बुज-गता चतुर्वक्त्र-मनोहरा।
शूलाद्यायुध-सम्पन्ना पीतवर्णाऽतिगर्विता॥ १०४॥

मेदोनिष्ठा मधुप्रीता बन्धिन्यादि-समन्विता।
दध्यन्नासक्त-हृदया काकिनी-रूप-धारिणी॥ १०५॥

मूलाधाराम्बुजारूढा पञ्च-वक्त्राऽस्थि-संस्थिता।
अङ्कुशादि-प्रहरणा वरदादि-निषेविता॥ १०६॥

मुद्गौदनासक्त-चित्ता साकिन्यम्बा-स्वरूपिणी।
आज्ञा-चक्राब्ज-निलया शुक्लवर्णा षडानना॥ १०७॥

मज्जासंस्था हंसवती-मुख्य-शक्ति-समन्विता।
हरिद्रान्नैक-रसिका हाकिनी-रूप-धारिणी॥ १०८॥

सहस्रदल-पद्मस्था सर्व-वर्णोप-शोभिता।
सर्वायुधधरा शुक्ल-संस्थिता सर्वतोमुखी॥ १०९॥

सर्वौदन-प्रीतचित्ता याकिन्यम्बा-स्वरूपिणी।
स्वाहा स्वधाऽमतिर् मेधा श्रुतिः स्मृतिर् अनुत्तमा॥ ११०॥

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवण-कीर्तना।
पुलोमजार्चिता बन्ध-मोचनी बन्धुरालका॥ १११॥

विमर्शरूपिणी विद्या वियदादि-जगत्प्रसूः।
सर्वव्याधि-प्रशमनी सर्वमृत्यु-निवारिणी॥ ११२॥

अग्रगण्याऽचिन्त्यरूपा कलिकल्मष-नाशिनी।
कात्यायनी कालहन्त्री कमलाक्ष-निषेविता॥ ११३॥

ताम्बूल-पूरित-मुखी दाडिमी-कुसुम-प्रभा।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी॥ ११४॥

नित्यतृप्ता भक्तनिधिर् नियन्त्री निखिलेश्वरी।
मैत्र्यादि-वासनालभ्या महाप्रलय-साक्षिणी॥ ११५॥

परा शक्तिः परा निष्ठा प्रज्ञानघन-रूपिणी।
माध्वीपानालसा मत्ता मातृका-वर्ण-रूपिणी॥ ११६॥

महाकैलास-निलया मृणाल-मृदु-दोर्लता।
महनीया दयामूर्तिर् महासाम्राज्य-शालिनी॥ ११७॥

आत्मविद्या महाविद्या श्रीविद्या कामसेविता।
श्री-षोडशाक्षरी-विद्या त्रिकूटा कामकोटिका॥ ११८॥

कटाक्ष-किङ्करी-भूत-कमला-कोटि-सेविता।
शिरःस्थिता चन्द्रनिभा भालस्थेन्द्र-धनुःप्रभा॥ ११९॥

हृदयस्था रविप्रख्या त्रिकोणान्तर-दीपिका।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञ-विनाशिनी॥ १२०॥

दरान्दोलित-दीर्घाक्षी दर-हासोज्ज्वलन्-मुखी।
गुरुमूर्तिर् गुणनिधिर् गोमाता गुहजन्मभूः॥ १२१॥

देवेशी दण्डनीतिस्था दहराकाश-रूपिणी।
प्रतिपन्मुख्य-राकान्त-तिथि-मण्डल-पूजिता॥ १२२॥

कलात्मिका कलानाथा काव्यालाप-विनोदिनी।
सचामर-रमा-वाणी-सव्य-दक्षिण-सेविता॥ १२३॥

आदिशक्तिर् अमेयाऽऽत्मा परमा पावनाकृतिः।
अनेककोटि-ब्रह्माण्ड-जननी दिव्यविग्रहा॥ १२४॥

क्लींकारी केवला गुह्या कैवल्य-पददायिनी।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस् त्रिदशेश्वरी॥ १२५॥

त्र्यक्षरी दिव्य-गन्धाढ्या सिन्दूर-तिलकाञ्चिता।
उमा शैलेन्द्रतनया गौरी गन्धर्व-सेविता॥ १२६॥

विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वरी।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा॥ १२७॥

सर्ववेदान्त-संवेद्या सत्यानन्द-स्वरूपिणी।
लोपामुद्रार्चिता लीला-क्लृप्त-ब्रह्माण्ड-मण्डला॥ १२८॥

अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता।
योगिनी योगदा योग्या योगानन्दा युगन्धरा॥ १२९॥

इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिणी।
सर्वाधारा सुप्रतिष्ठा सदसद्रूप-धारिणी॥ १३०॥

अष्टमूर्तिर् अजाजैत्री लोकयात्रा-विधायिनी।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता॥ १३१॥

अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्य-स्वरूपिणी।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया॥ १३२॥

भाषारूपा बृहत्सेना भावाभाव-विवर्जिता।
सुखाराध्या शुभकरी शोभना सुलभा गतिः॥ १३३॥

राज-राजेश्वरीराज्य-दायिनी राज्य-वल्लभा।
राजत्कृपा राजपीठ-निवेशित-निजाश्रिता॥ १३४॥

राज्यलक्ष्मीः कोशनाथा चतुरङ्ग-बलेश्वरी।
साम्राज्य-दायिनी सत्यसन्धा सागरमेखला॥ १३५॥

दीक्षिता दैत्यशमनी सर्वलोक-वशङ्करी।
सर्वार्थदात्री सावित्री सच्चिदानन्द-रूपिणी॥ १३६॥

देश-कालापरिच्छिन्ना सर्वगा सर्वमोहिनी।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी॥ १३७॥

सर्वोपाधि-विनिर्मुक्ता सदाशिव-पतिव्रता।
सम्प्रदायेश्वरी साध्वी गुरुमण्डल-रूपिणी॥ १३८॥

कुलोत्तीर्णा भगाराध्या माया मधुमती मही।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया॥ १३९॥

स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्ति-रूपिणी।
सनकादि-समाराध्या शिवज्ञान-प्रदायिनी॥ १४०॥

चित्कलाऽऽनन्द-कलिका प्रेमरूपा प्रियङ्करी।
नामपारायण-प्रीता नन्दिविद्या नटेश्वरी॥ १४१॥

मिथ्या-जगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी।
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता॥ १४२॥

भवदाव-सुधावृष्टिः पापारण्य-दवानला।
दौर्भाग्य-तूलवातूला जराध्वान्त-रविप्रभा॥ १४३॥

भाग्याब्धि-चन्द्रिका भक्त-चित्तकेकि-घनाघना।
रोगपर्वत-दम्भोलिर् मृत्युदारु-कुठारिका॥ १४४॥

महेश्वरी महाकाली महाग्रासा महाशना।
अपर्णा चण्डिका चण्डमुण्डासुर-निषूदिनी॥ १४५॥

क्षराक्षरात्मिका सर्व-लोकेशी विश्वधारिणी।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका॥ १४६॥

स्वर्गापवर्गदा शुद्धा जपापुष्प-निभाकृतिः।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता॥ १४७॥

दुराराध्या दुराधर्षा पाटली-कुसुम-प्रिया।
महती मेरुनिलया मन्दार-कुसुम-प्रिया॥ १४८॥

वीराराध्या विराड्रूपा विरजा विश्वतोमुखी।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी॥ १४९॥

मार्ताण्ड-भैरवाराध्या मन्त्रिणीन्यस्त-राज्यधूः।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा॥ १५०॥

सत्य-ज्ञानानन्द-रूपा सामरस्य-परायणा।
कपर्दिनी कलामाला कामधुक् कामरूपिणी॥ १५१॥

कलानिधिः काव्यकला रसज्ञा रसशेवधिः।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा॥ १५२॥

परंज्योतिः परंधाम परमाणुः परात्परा।
पाशहस्ता पाशहन्त्री परमन्त्र-विभेदिनी॥ १५३॥

मूर्ताऽमूर्ताऽनित्यतृप्ता मुनिमानस-हंसिका।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती॥ १५४॥

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता।
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः॥ १५५॥

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठ-रूपिणी।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः॥ १५६॥

मुकुन्दा मुक्तिनिलया मूलविग्रह-रूपिणी।
भावज्ञा भवरोगघ्नी भवचक्र-प्रवर्तिनी॥ १५७॥

छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी।
उदारकीर्तिर् उद्दामवैभवा वर्णरूपिणी॥ १५८॥

जन्ममृत्यु-जरातप्त-जनविश्रान्ति-दायिनी।
सर्वोपनिष-दुद्-घुष्टा शान्त्यतीत-कलात्मिका॥ १५९॥

गम्भीरा गगनान्तस्था गर्विता गानलोलुपा।
कल्पना-रहिता काष्ठाऽकान्ता कान्तार्ध-विग्रहा॥ १६०॥

कार्यकारण-निर्मुक्ता कामकेलि-तरङ्गिता।
कनत्कनकता-टङ्का लीला-विग्रह-धारिणी॥ १६१॥

अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्र-प्रसादिनी।
अन्तर्मुख-समाराध्या बहिर्मुख-सुदुर्लभा॥ १६२॥

त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी।
निरामया निरालम्बा स्वात्मारामा सुधासृतिः॥ १६३॥

संसारपङ्क-निर्मग्न-समुद्धरण-पण्डिता।
यज्ञप्रिया यज्ञकर्त्री यजमान-स्वरूपिणी॥ १६४॥

धर्माधारा धनाध्यक्षा धनधान्य-विवर्धिनी।
विप्रप्रिया विप्ररूपा विश्वभ्रमण-कारिणी॥ १६५॥

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी।
अयोनिः योनिनिलया कूटस्था कुलरूपिणी॥ १६६॥

वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी।
विज्ञानकलना कल्या विदग्धा बैन्दवासना॥ १६७॥

तत्त्वाधिका तत्त्वमयी तत्त्वमर्थ-स्वरूपिणी।
सामगानप्रिया सौम्या सदाशिव-कुटुम्बिनी॥ १६८॥

सव्यापसव्य-मार्गस्था सर्वापद्विनिवारिणी।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता॥ १६९॥

चैतन्यार्घ्य-समाराध्या चैतन्य-कुसुमप्रिया।
सदोदिता सदातुष्टा तरुणादित्य-पाटला॥ १७०॥

दक्षिणा-दक्षिणाराध्या दरस्मेर-मुखाम्बुजा।
कौलिनी-केवलाऽनर्घ्य-कैवल्य-पददायिनी॥ १७१॥

स्तोत्रप्रिया स्तुतिमती श्रुति-संस्तुत-वैभवा।
मनस्विनी मानवती महेशी मङ्गलाकृतिः॥ १७२॥

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी।
प्रगल्भा परमोदारा परामोदा मनोमयी॥ १७३॥

व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी।
पञ्चयज्ञ-प्रिया पञ्च-प्रेत-मञ्चाधिशायिनी॥ १७४॥

पञ्चमी पञ्चभूतेशी पञ्च-संख्योपचारिणी।
शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी॥ १७५॥

धराधरसुता धन्या धर्मिणी धर्मवर्धिनी।
लोकातीता गुणातीता सर्वातीता शमात्मिका॥ १७६॥

बन्धूक-कुसुमप्रख्या बाला लीलाविनोदिनी।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी॥ १७७॥

सुवासिन्यर्चन-प्रीताऽऽशोभना शुद्धमानसा।
बिन्दु-तर्पण-सन्तुष्टा पूर्वजा त्रिपुराम्बिका॥ १७८॥

दशमुद्रा-समाराध्या त्रिपुराश्री-वशङ्करी।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेय-स्वरूपिणी॥ १७९॥

योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा।
अनघाऽद्भुत-चारित्रा वाञ्छितार्थ-प्रदायिनी॥ १८०॥

अभ्यासातिशय-ज्ञाताषडध्वातीत-रूपिणी।
अव्याज-करुणा-मूर्तिरज्ञान-ध्वान्त-दीपिका॥ १८१॥

आबाल-गोप-विदिता सर्वानुल्लङ्घ्य-शासना।
श्रीचक्रराज-निलया श्रीमत्-त्रिपुरसुन्दरी॥ १८२॥

श्री शिवाशिवशक्त्यैक्य रूपिणी, ललिताम्बिका।
श्रीशिवाशिवशक्त्यैक्यरूपिणी,ललिताम्बिका॥ १८३॥

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीललितासहस्रनाम स्तोत्र कथनं सम्पूर्णम्॥

प्रधान आरती

(कर्पूर और घृतवर्तिका बनाकर आरती करना चाहिए)

ॐअन्तस्तेजो बहिस्तेज एकी कृत्यामितप्रभम्।
त्रिधा दीपं परिभ्राम्य कुलदीपं निवेदये॥

समस्त चक्र चक्रेशी युते देवी नवात्मिके।
आरार्तिक मिदम भद्रे गृहाण मम सिद्धये॥

कर्मसमर्पण मातृकास्तोत्रम्

हाथ जोड़कर स्तुति पाठ करेंगे और अंत में एक अर्घा जल यंत्र के ऊपर समर्पित कर देंगे।

ॐ/नमो/श्री/ह्रीम् गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम्।
देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम्॥ १ ॥

प्रणमामि महादेवीं मातृकां परमेश्वरीम्।
कालहल्लोहलोल्लोलकलनाशमकारिणीम्॥ २ ॥

यदक्षरैकमात्रेऽपि संसिद्धे स्पर्धते नरः।
रविताक्ष्यैन्दुकन्दर्पशङ्करानलविष्णुभिः॥ ३ ॥

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम्।
वन्दे सर्वेश्वरी देवीं महाश्रीसिद्धमातृकाम्॥ ४॥

यदक्षर महामन्त्र प्रोतमेतज्जगत्रयम्।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम्॥ ५॥

यदेकादशमाधारं बीजं कोणत्रयोद्भवम्।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते॥ ६॥

अक्रचादिटतोन्नद्धपयशाक्षरत्रगिणीम्।
ज्येष्ठाङ्गवाहुपादाग्रमध्यस्वान्तनिवासिनीम्॥ ७॥

नामीकाराक्षरोद्धारां सारात्सारां परात्पराम्।
प्रगमामि महादेवीं परमानन्दरूपिणीम्॥ ८॥

अद्यापि यस्या जानन्ति न मनागपि देवताः।
केयं कस्मात् क केनेति सरूपारूपभात्रनाम्॥ ९॥

बन्द तामहमक्षय्यां क्षकाराक्षररूपिणीम्।
देवीं कुलकलोल्लासप्रोल्लसन्तीं परां शिवाम्॥ १०॥

वर्गानुक्रमयोगेण यस्यां मात्रष्टकं स्थितम्।
वन्दे तामष्टवर्गोत्थमहासिद्धयष्टकेश्वरीम्॥ ११॥

काम पूर्णजकाराख्यश्रीपीठान्तर्निवासिनीम्।
चतुराजाकोशभूतां नौमि श्रोत्रिपुरामहम्॥ १२॥

इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत् !

देव्यास्त्वखण्डरूपायाः स्तवनं तव तद्यतः॥

भूमौ स्खलितपादानां भूमिरेवावलम्बनम्।
त्वयि जातापराधानां त्वमेव शरणं शिवे॥

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तत्र भवतु यन्मे विलसितम्॥

पिता माता भ्राता गुरुरथ सुहृदबान्धवजनः
प्रभुस्तीर्थं कर्माविकलमिह चामुत्र च हितम्।
विशुद्धा विद्या वा पदमपि च तत्प्राप्यमसि मे
त्वमेव श्रीमातः स्वपिमि गतशङ्कः सुखतमः॥

दृशा द्राघी यस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः॥

हे सद्रूपिणि हे चिदचिरुदये हे कामराजप्रिये
हे भण्डासुरहन्त्री अद्भुत निधे हेऽनङ्गसंजीविनि।
हे विश्वप्रसवित्रि हे सकरुणे हे दीनरक्षामणे
हे श्रीमल्ललिताम्ब हे परशिवे मां पाहि डिम्भं निजम्॥

नमो हेमाद्रिस्थे शिवसति नमः श्रीपुरगते
नमः पद्माटव्यां कुतुकिनि नमो रत्नगृहगे।
नमः श्रीचक्रस्थेऽखिलमय नमो बिन्दुनिळये
नमः कामेशाङ्कस्थितिमति नमस्तेऽम्ब ललिते॥

जय जय जगदम्ब भक्तवश्ये जय जय सान्द्रकृपावशान्तरङ्गे।
जय जय निखिलार्थदानशौण्डे जय जय हे ललिताम्ब चित्सुखाब्धे॥

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया।
तत्सर्वं कृपया देवि गृहाणाराधनं मम॥

त्रिपुरसुन्दरी श्री देवी गृहाणे तत कृतं मया।
त्राहि त्राहि कृपासिन्धो पूजां पूर्णतरां कुरु॥

ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं शिवे।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि॥

हृत्पद्मकणिकामध्ये शिवेन सह शङ्करि।
प्रविश त्वं महादेवि सर्वैरावरणैः सह॥

संपूजकानां परिपालकानां यतेन्द्रियाणां च तपोधनानाम्।
देशस राष्ट्रस कुलस्य राज्ञां करोतु शान्ति भगवान् कुलेशः॥

नन्दन्तु साधककुलान्यणिमादिसिद्धाः
शापाः पतन्तु समयद्विषि योगिनीनाम्।
सा शाम्भवी स्फुरतु कापि ममाप्यवस्था
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम्॥

शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम्।
कालाग्न्यादि शिवान्तं च जगद्यज्ञेन तृप्यतु॥

इति श्रीललितासहस्रनामस्तोत्रम् सप्रयोग सम्पूर्णम्।

॥ श्रीअम्बार्पणमस्तु॥